ऊरीकृत्य। ऊरीकृतम। यदूरीकरोति। उररीकृत्य। उररीकृतम्। यदुररीकरोति। [1]पापी। [2]ताली। आताली। वेताली। धूसी[3]। शकला। संशकला। ध्वंसकला। भ्रंशकला। एते शकलादयो हिंसायाम् (ग.र. १३६)। शकलाकृत्य। संशकलाकृत्य। ध्वंसकलाकृत्य। भ्रंशकलाकृत्य। गुलुगुधा पीडार्थे (ग.र. १३६)–गुलुगुधाकृत्य। सजूः सहार्थे (ग.र. १३७)–सजूःकृत्य। फलू, फली, विक्ली, आक्ली इति विकारे (ग.र· १३७)–फलूकृत्य। फलीकृत्य। विक्लीकृत्य। [4]आलोष्टी। कराली। केवाली। शेवाली। वर्षाली। मस्मसा। मसमसा। एते हिंसायाम्। [5]वषट्। वौषट्। श्रौषट्। स्वाहा। स्वधा। बन्धा। प्रादुस्। श्रुत्। आविस्। [6]च्व्यन्ताः खल्वपि––शुक्लीकृत्य। शुक्लीकृतम्। [7]यच्छुक्लीकरोति। डाच्––पटपटाकृत्य। [8]पटपटाकृतम्। यत्पटपटाकरोति ॥

## अनुकरणं चानितिपरम्। (६२/७६३)

इतिः परो यस्मात् इति बहुव्रीहिः। अनुकरणमनिति[9]परं क्रियायोगे गतिसञ्ज्ञं भवति। [10]खाट्कृत्य। खाट्कृतम्। यत्खाट्करोति। अनितिपरम् इति किम्? खाडिति कृत्वा निरष्ठीवत् ॥

## आदरानादरयोः सदसती। (६३/७६४)

[11]प्रीतिसंभ्रम आदरः। परिभवौदासीन्यम् अनादरः। आदरानादरयोः[12]यथाक्रमं सदसच्छब्दौ गतिसञ्ज्ञौ भवतः। सत्कृत्य। सत्कृतम्। यत्सत्करोति। असत्कृत्य। असत्कृतम्। यदसत्करोति। आदरानादरयोः इति किम्? सत्कृत्वा [13]काण्डं गतः। असत्कृत्वा काण्डं गतः ॥

## भूषणेऽलम्। (६४/७६५)

अलम् इति प्रतिषेधे, सामर्थ्ये, पर्याप्तौ, भूषणे च [14]इति विशेषणमुपादीयते। [15]भूषणे योऽलंशब्दः स गतिसञ्ज्ञो भवति। अलङ्कृत्य। अलङ्कृतम्। यदलङ्करोति। भूषणे इति किम्? अलं भुक्त्वा ओदनं गतः ॥

## अन्तरपरिग्रहे। (६५/७६६)

अन्तःशब्दोऽपरिग्रहेऽर्थे[16] गतिसञ्ज्ञो भवति। [17]परिग्रहः स्वीकरणम्। तदभावे गतिसञ्ज्ञा विधीयते। अन्तर्हत्य। अन्तर्हतम्। [18]यदन्तर्हन्ति। अपरिग्रहे इति किम्? [19]अन्तर्हत्वा मूषिकां श्येनो गतः। [20]परिगृह्य गतः इत्यर्थः।

[७१] अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गसञ्ज्ञा वक्तव्या। (म.भा. १.३४४)
अन्तर्धा (३.३.१०६/३२८३)। अन्तर्धिः (३.३.९२/३२७०)। अन्तर्णयति (८.४.१४/२२८७) ॥

---

1. पाली ह, आली फ. 2. नाली ड, सूली फ. 3. धूली ड, पाप्यादयः विस्तारे इत्यधिकम् अ. 4. आलाष्ठी करासी केवाली पर्याली सेवाली शेवाली वर्षाली वश्मसा इत्यधिकम् ड. 5 नास्ति ह. 6. च्व्यर्थाः ड. 7. नास्ति ह. 8. नास्ति ह. 9. °परतः फ. 10. खात्कृत्य ह. 11. प्रीत्यतिशयः ड. इ. ग. 12. यथासङ्ख्यम् ह. 13. काण्डं नास्ति ड. 14. वर्तते फ. ह, अतः फ. 15. भूषणे–करोति नास्ति अ. 16. यः सः इत्यधिकम् क. 17. परिग्रहं ह. 18. नास्ति फ, यदन्तर्हतं ब. 19. अन्तर्हित्वा ह अन्तर्हत्वा मूषकान् ड. 20. वाक्यमिदं नास्ति फ.